# गंगाष्टकं

# Ganga Ashtakam

भगवति तव तीरे नीरमात्राशनोऽहम्
विगतविषयतृष्णः कृष्णमाराधयामि ।
सकल कलुषभंगे स्वर्गसोपानसंगे
तरलतरतरंगे देवि गंगे प्रसीद ॥ 1 ॥

भगवति भवलीला मौलिमाले तवांभः
कणमणुपरिमाणं प्राणिनो ये स्पृशंति ।
अमरनगरनारी चामर ग्राहिणीनां
विगत कलिकलंकातंकमंके लुठंति ॥ 2 ॥

ब्रह्मांडं खंडयंती हरशिरसि जटावल्लिमुल्लासयंती
स्वर्लोकादापतंती कनकगिरिगुहागंडशैलात् स्खलंती ।
क्षोणीपृष्ठे लुठंती दुरितचयचमूर्निर्भरं भर्त्सयंती
पाथोधिं पूरयंती सुरनगरसरित्पावनी नः पुनातु ॥ 3 ॥

मज्जन्मातंग कुंभच्युत मदमदिरामोदमत्तालिजालं
स्नानैः सिद्धांगनानां कुचयुग विलसत्कुंकुमासंगपिंगम् ।
सायं प्रातर्मुनीनां कुशकुसुमचयैश्छिन्नतीरस्थनीरं
पायान्नो गांगमंभः करिकलभ कराक्रांत रंगस्तरंगम् ॥ 4 ॥

आदावादि पितामहस्य नियम व्यापार पात्रे जलं
पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् ।
भूयः शंभुजटाविभूषण मणिर्जह्नोर्महर्षेरियं
कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥ 5 ॥

॥

eAstroHelp
Your Happiness Helpline

शैलेंद्रादवतारिणी निजजले मज्जज्जनोत्तारिणी
पारावारविहारिणी भवभयश्रेणी समुत्सारिणी ।
शेषांगैरनुकारिणी हरशिरोवल्लीदलाकारिणी
काशीप्रांतविहारिणी विजयते गंगा मनोहारिणी ॥ 6 ॥

कुतो वीचिर्वीचिस्तव यदि गता लोचनपथं
त्वमापीता पीतांबरपुरवासं वितरसि ।
त्वदुत्संगे गंगे पतति यदि कायस्तनुभृतां
तदा मातः शांतक्रतवपदलाभोऽप्यतिलघुः ॥ 7 ॥

गंगे त्रैलोक्यसारे सकलसुरवधूधौतविस्तीर्णतोये
पूर्णब्रह्मस्वरूपे हरिचरणरजोहारिणि स्वर्गमार्गे ।
प्रायश्चितं यदि स्यात्तव जलकणिका ब्रह्महत्यादि पापे
कस्त्वां स्तोतुं समर्थः त्रिजगदघहरे देवि गंगे प्रसीद ॥ 8 ॥

मातर्जाह्नवी शंभुसंगमिलिते मौलौ निधायांजलिं
त्वत्तीरे वपुषोऽवसानसमये नारायणांघ्रिद्वयम् ।
सानंदं स्मरतो भविष्यति मम प्राणप्रयाणोत्सवे
भूयाद्भक्तिरविच्युता हरिहराद्वैतात्मिका शाश्वती ॥ 9 ॥

गंगाष्टकमिदं पुण्यं यः पठेत्प्रयतो नरः ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ 10

eAstroHelp
Your Happiness Helpline